# Vivarnadi Vishnu Sahasranamastotram

# विवर्णादि विष्णुसहस्रनामस्तोत्रम्

## Document Information

Text title : Vivarnadi Vishnu Sahasranama Stotram

File name : vivarNAdiviShNusahasranAmastotram.itx

Category : vishhnu, sahasranAma

Location : doc_vishhnu

Author : Bellamkonda Rama Raya Kavindrulu (1875-1914)

Transliterated by : Sivakumar Thyagarajan Iyer

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Acknowledge-Permission: Bellamkonda Chakradhar Kumar

Latest update : December 19, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# विवर्णादि विष्णुसहस्रनामस्तोत्रम्

ॐ श्रीगणेशाय नमः ।

ॐ विष्णुर्विश्वं विश्वकर्ता विश्वहृद्विश्वपालकः ।
विश्वदूरो विश्वगतो विश्वात्मा विश्वचेतनः ॥ १॥

विश्वयन्ता विश्वतनुर्विश्वविद्विश्वदुर्गमः ।
विश्वाज्ञेयात्मको विश्वनिदानं विश्वपावनः ॥ २॥

विश्वोदयो विश्वलयो विविश्वो विश्वपारगः ।
विश्वम्भरो विश्वमयो विश्वभुक् विश्वमोहनः ॥ ३॥

विश्वानन्दो विश्वदुःखदूरो विश्वसुखप्रदः ।
विश्वप्रियो विश्वसखो विश्वधृद्विश्वरूपधृत् ॥ ४॥

विश्वक्रीडो विश्वसेव्यो विश्वदो विश्वसम्मतः ।
विश्वभोग्यो विश्वगुणो विश्वचक्षुर्विरिञ्चिकृत् ॥ ५॥

विश्वचक्षुर्मण्डलस्थो विश्वचक्षुःप्रकाशकृत् ।
विश्वो विश्वान्तरो विश्वतनुः विश्वप्रचोदनः ॥ ६॥

विश्वांशो विस्मयावासो विश्वकल्याणभाजनम् ।
विश्वबिम्बो विश्वनिधिर्विश्वमायो विभामयः ॥ ७॥

विवस्वन्मण्डलान्तस्थो विद्यासुखसदात्मकः ।
विवस्वान्विग्रहादित्यो विवस्वद्भासको विभुः ॥ ८॥

विकर्तनसहस्राभो विष्वक्सेनो विकुण्ठगः ।
विद्युत्पीताम्बरो विद्यामन्दिरो विष्टरश्रवाः ॥ ९॥

विनायको विप्रबन्धुर्विद्युत्त्वन्मुग्धविग्रहः ।
वियद्गङ्गापदाम्भोजो विक्रमक्रान्तलोककः ॥ १०॥

विरिञ्चिनाभीकमलो विनतातनयध्वजः ।

विषायनो विषधरस्वामिशय्यो विषोदयः ॥ ११॥

विषापहारी विषधिस्तोमकुक्षिर्वियत्समः ।
विलयाम्बुधिविश्रान्तो विकाररहितो विधुः ॥ १२॥

विधिरुद्रेन्द्रदासेरो विबुधावलिपक्षगः ।
विबुधेशो विधूताघो विरुग्णमधुकैटभः ॥ १३॥

विधुमण्डलमध्यस्थो विधुसूर्यविलोचनः ।
विधुसुन्दरवक्त्राब्जो विधुहेतुहृदम्बुजः ॥ १४॥

विधुलेखानखो विज्ञो विभयो विद्रुमादरः ।
विषण्णासुरराड्त्राता विनाथजनरक्षणः ॥ १५॥

विभवो विहतारातिर्विस्पष्टकमलेक्षणः ।
विरिञ्चिवनितागीतो विमृष्टमणिनूपुरः ॥ १६॥

विद्युद्रुचिरलक्ष्मीको विलसत्स्मेरचन्द्रिकः ।
विकस्वरसुरोर्वीजपुष्पमालानिभेक्षणः ॥ १७॥

विरूपाक्षप्रियो विद्वद्धृदयाम्बुजबम्भरः ।
विमुक्तो विषयासक्तो विपत्समयबान्धवः ॥ १८॥

विपुलोरा विशालाक्षो विपुलांसो विजित्त्वरः ।
विमलो विततख्यातिर्विश्वनामा विभीषणः ॥ १९॥

विलासी विलसद्भूषो विविधायुधभास्वरः ।
विश्वम्भरापतिर्विश्वातिक्रान्तमहिमा विधिः ॥ २०॥

विधित्राता विधितपःफलदो विधिदेशिकः ।
विधिस्तुतो विधिविधुश्रीकण्ठात्मा विधीश्वरः ॥ २१॥

विधिशक्तिप्रदो विश्वशक्तिर्विधिविमोहनः ।
विविधात्मज्ञानबलक्रियाशक्तिर्विलक्षणः ॥ २२॥

विश्वोत्तमो विसदृशो विद्वन्द्वो विगतव्ययः ।
विमत्सरो विश्वसिद्धिर्विजितात्मा विमुक्तिदः ॥ २३॥

विश्वम्भराभारहरो विष्वद्रीचीनवैभवः ।
विविधप्राणिकरुणो विद्रावितजनान्तकः ॥ २४॥

विधूतमायाविभवो विख्यातबलपौरुषः ।
विनिद्रो विजरो वित्तो विदोषो विफलक्रियः ॥ २५॥

विज्ञानवादी विमदो विक्रोधो विजितेन्द्रियः ।
विनेता विश्रुतकथो विमलाशयदर्शनः ॥ २६॥

वितर्कहीनो विरुजो विभेदो विप्रियाप्रियः ।
विज्वरो विकचाम्भोजचरणो विनताखिलः ॥ २७॥

विधिकर्ता विधानज्ञो विधिर्विधिफलप्रदः ।
विधिदृष्टक्रियाभ्यर्च्यो विधिहीनो विधिप्रियः ॥ २८॥

विधिसूत्राबद्धलोको विधिवत्कृतकर्मपः ।
विहितत्यागिसंशास्ता विहिताविहितागतिः ॥ २९॥

विहिताखिलमर्यादो विधिरुद्रादिशासनः ।
विधिवत्कर्मसङ्गोप्ता विधिविद्वेषिभञ्जनः ॥ ३०॥

विधातृदर्शितपदो विधिलोपापहाभिधः ।
विलसत्कमलावक्षा विप्रदैवो विपद्धरः ॥ ३१॥

विधुविद्योतमानाब्जो विरोचनसुदर्शनः ।
विद्विड्रक्ताचितगदो विपन्नाभयकृत्करः ॥ ३२॥

विशुद्धविज्ञानघनो विज्ञानकलनप्रभुः ।
वितीर्णविमलप्रज्ञो विश्राणनसुरद्रुमः ॥ ३३॥

विधिकोटिशतानन्दो विवादाविषयो विशः ।
विह्वलद्विरदत्राता विषाटीन्द्रविदारणः ॥ ३४॥

विविधाख्यानसंस्थाननिर्माता विश्वतोमुखः ।
विष्वग्भुजानीकशतो विकचाब्जायुतेक्षणः ॥ ३५॥

विष्वक्शिरा विष्वगङ्घ्रिर्विष्वक्छ्रोत्रो विसृत्वरः ।
विष्वगूरुर्विष्वगुरा विष्वक्कण्ठो विपुष्करः ॥ ३६॥

विद्युत्त्वत्केशनिचयो विटपिव्रातलोमकः ।
विष्णुपद्यादितटिनीनाडीको विष्टपाकृतिः ॥ ३७॥

विवस्वत्तनयोदारदंष्ट्रो विष्णुपदाक्षिकः ।
विन्ध्यादिभूमिधरास्थिर्विद्याहासो विकम्पनः ॥ ३८॥

विबुधेशभुजव्रातो वियद्वैद्योरुनाशिकः ।
विदिक्कर्णो विधिस्थानमौलिर्विश्वम्भरापदः ॥ ३९॥

विहङ्गमव्याकरणो वियन्मध्यो विराड्वपुः ।
विदीप्तसन्ध्यावसनो विधृतोडुसुमस्रजः ॥ ४०॥

विदीर्णकाण्डपटहो वियदम्बुनिषिक्तपत् ।
विलयाभिकृताचामो विश्वाहारो विशृङ्खलः ॥ ४१॥

विसृत्वरतमस्सिन्धुमध्यस्थो विगताशयः ।
विलीनशक्तिर्विश्रान्तो विहितात्मसुखाशनः ॥ ४२॥

विक्षेपहीनो विकृतिर्विगुणी विगतावृतिः ।
विलीनपुरुषाज्ञानोपाधिद्विश्वपरायणः ॥ ४३॥

विश्वादृष्टवशत्यक्तयोगनिद्रो विबुद्धधीः ।
विश्वाब्जनाभिर्विविधप्राणिबीजकृतोदयः ॥ ४४॥

विरिञ्च्यादिप्रजानाथसमुत्पादितसत्प्रजः ।
विश्वभूरुण्मूलकन्दो विश्ववृद्धिविधायकः ॥ ४५॥

विचित्रवीर्यो विचित्रकृत्यो विश्वकुटुम्बकः ।
विचित्रावतारो विश्वरक्षावहितमानसः ॥ ४६॥

विचित्रालयमायेशो विश्वपावनचेष्टितः ।
विद्यानिधिर्विद्वदाप्तो विरक्तजनशेवधिः ॥ ४७॥

वितृप्तो विरतो विस्थो विक्रीडो विदितात्मकः ।
विहतेन्द्रियसञ्चारो विदिताविदितेतरः ॥ ४८॥

विपापो विकलो विस्स्वो विपुण्यो विपरो वियत् ।
विदुःखो विसुखो विज्यो विवायुर्विविरोचनः ॥ ४९॥

विजलो विगतस्पर्शो विरसो विगतध्वनिः ।
विगन्धो विमहत्तत्त्वो विगताहङ्कृतिर्विधः ॥ ५०॥

विरूपो विगताभिख्यो विस्त्रीभावो विपौरुषः ।
विक्लैब्यो विमनुष्यत्वो विदैवो विगतासुरः ॥ ५१॥

विशेषो विश्वधिक्कारशेषो विश्वतमोरविः ।

विसङ्गो विगतासङ्गो विबन्धो विश्वबन्धकृत् ॥ ५२॥

विपाणिर्विपदो विश्वग्राही विश्वातिगस्यदः ।
विचक्षुर्विश्वदृग्विश्वश्रोता विगतकर्णकः ॥ ५३॥

विप्राणो विविधप्राणिप्राणनो विमना विखः ।
विशुभ्रो विद्युदापीतशिखान्तस्थो वियत्पदः ॥ ५४॥

विघ्नो विनायकाधीशो विघ्नहर्ता विकामनः ।
विश्वासी विश्वजनको विश्वायुष्योपसङ्ग्रहः ॥ ५५॥

विपदम्बुधिपोताङ्घ्रिर्विचारासहनाकृतिः ।
विराजद्विक्रमादित्यो विपश्चिद्दलभूषणम् ॥ ५६॥

वियच्छत्रो विधुमयादर्शो विश्वम्भरासनः ।
विरोचनप्रतीहारो विद्युन्मालामयाम्बरः ॥ ५७॥

विषराशिस्फुरत्पात्रो विटनायककन्दुकः ।
विदिक्पदिक्पालभृत्यो विचरद्वायुचामरः ॥ ५८॥

विरोचनमुखो विप्रमुखो विधिहुताशनः ।
विडूरुर्विविधक्षत्रबाहुर्विधिकराङ्घ्रिकः ॥ ५९॥

विश्वम्भरातिवर्तिष्णुदशाङ्गुलमहाकृतिः ।
विश्वभूतमयैकांशो विविश्वत्रिपदामृतः ॥ ६०॥

विद्याविद्यासृतिक्रान्ता विबुधाहवसद्धविः ।
विपन्यु विप्रसञ्चिन्त्यो वितानमयविग्रहः ॥ ६१॥

वितानकृद्वितानेशो वितानाङ्गवपाशनः ।
वितानवीतिहोत्रात्मा वितानायुतदुर्लभः ॥ ६२॥

विजयी विजयागीतनामा विजयदायकः ।
विजयाजयतुल्यांशो विजेतव्यविवर्जितः ॥ ६३॥

विशेषहीनचिद्रूपो विशिष्टो विगताञ्जनः ।
विशेषणीभूतविश्वो विबुधालिसुधाकरः ॥ ६४॥

विश्वकेतुमनोज्ञाङ्गो विधुन्तुदनिकृन्तनः ।
विश्वकेतुपिता विश्वकेतुवैभववर्धनः ॥ ६५॥

विश्वकेतुर्विश्वकेतुजयी विश्वप्रलोभनः ।
विश्वकेतुस्मरो विश्वकेतुर्विश्वजयप्रदः ॥ ६६ ॥

विद्याधरादिविनुतो विभूतिसमुपासितः ।
विभूतिभूषितमुनिर्विभूतिमयविष्टपः ॥ ६७ ॥

विभूत्यलुब्धस्वजनो विभूतिविभवप्रदः ।
विभूतिदुर्विभाव्यात्मा विभूतिसमुदञ्चनः ॥ ६८ ॥

वितथेतरसङ्कल्पो विविक्तबहुलक्रियः ।
विविक्तरूपो विविक्तनामा विशदसद्रदः ॥ ६९ ॥

विविक्तचिह्नो विस्पष्टपद्ममालो विशेषकी ।
विटीन्द्रशृङ्गमकुटो विशदोपलकुण्डलः ॥ ७० ॥

विश्वकेतुधनुःप्रायभ्रूलतो विस्तृताननः ।
विश्वमात्राशयहरो विलोलमधुपालकः ॥ ७१ ॥

विमुग्धनासिकादण्डो विशालहनुसुन्दरः ।
विश्वमात्राधर्मगण्डो विनीलश्मश्रुमण्डलः ॥ ७२ ॥

विशालाक्ष्यारक्तरेखो विस्तीर्णश्रीकृतिश्रवाः ।
विश्वमातृकरग्राह्यचिबुको विशदस्मितः ॥ ७३ ॥

विशालफालो विषजग्रीवो विषजरत्नधृत् ।
विलम्बिहाररुक्पूरविशदोरस्थलान्तरः ॥ ७४ ॥

विषध्रेन्द्रायतभुजो विषाणिरिपुमध्यमः ।
विनिम्ननाभिर्विपुलश्रोणिर्विविधलेपनः ॥ ७५ ॥

विनदत्स्वर्णवलयो विद्युद्व्रततिमेखलः ।
विषाणिकरमुग्धोरुर्यजतूणीरजङ्घिकः ॥ ७६ ॥

विगूढजत्रुर्विश्वौघशरण्याङ्घ्रिपयोरुहः ।
विसारवज्रचक्राब्जहलकेत्वङ्कधृत्पदः ॥ ७७ ॥

विद्रुमारक्तनखरो विविधाम्नायनूपुरः ।
विमुग्धस्निग्धरक्ताङ्घ्रितलो विसदृशाकृतिः ॥ ७८ ॥

विद्याराजो विद्यमानो विद्याकमलिनीरविः ।
विद्यमानागामीभूतप्रभुर्विद्यादुरन्वयः ॥ ७९ ॥

विद्यावल्लीमूलकन्दो विद्यानन्दाब्धिखेलनः ।
विद्यालतोपघ्नभुजो विद्याम्भोरुहबम्भरः ॥ ८० ॥

विद्यापद्ममरन्दात्मा विद्यापुष्करचन्द्रमाः ।
विद्याविनयसम्पन्नब्रह्महस्त्यादि तुल्यधीः ॥ ८१ ॥

विद्यानन्दमयो विद्यानन्दबिम्बो विविद्यकः ।
विद्याप्रदायी विद्यात्मा विद्याफलमयाकृतिः ॥ ८२ ॥

विद्यालक्ष्मीत्रपाकीर्तितुष्टिपुष्टिसतीवृतः ।
विक्रान्तो विह्वलत्राता वियातो विनयान्वितः ॥ ८३ ॥

विरोधहीनो विस्नेहो विगुणो विमदो विमः ।
विक्लमो विगताधर्मो विवृद्धिर्विपरिक्षयः ॥ ८४ ॥

विस्वेदो विमलो विस्रहीनो विक्षुर्वितृड्विभीः ।
विप्राकृतो विभापिण्डो विप्रमाणो विबन्धनः ॥ ८५ ॥

विप्रकृष्टो विकुर्वाणो विहारी विरलोदयः ।
विशाम्पतिर्विश्रुतात्मा विविधाम्नायमृग्यकृत् ॥ ८६ ॥

विविक्तसेविनेदीयान् विनायकविवर्जितः ।
विदैवो विप्लवाहर्ता विधेयाखिलदैवतः ॥ ८७ ॥

विकुण्ठलोकनिर्माता विकुण्ठेशो विकुण्ठभः ।
विकुण्ठाकूटतनयो विकुण्ठनगरीप्रियः ॥ ८८ ॥

विकुण्ठपद्ममार्तण्डो विकुण्ठविभवाश्रयः ।
विकुण्ठलोलो विकुण्ठनारीनयनचन्द्रमा ॥ ८९ ॥

विनतासुतसद्बाहुभासको दुर्विभासकः ।
विलोलतुलसीमालो विकचाब्जविधूननः ॥ ९० ॥

विशदोपलमुक्तौघछत्रद्वयसमञ्चितः ।
विवस्वद्युतच्छद्मप्रदीपो विचलत्पटः ॥ ९१ ॥

विधुबिम्बमयप्राज्या रात्रिकोडुप्रदीपितः ।
विमर्दोत्थापारगन्धमूर्छिताशाप्रबोधनः ॥ ९२ ॥

विश्वम्भराकराम्भोजचामरानिलसेवितः ।

विद्युद्दूषणभूषाङ्गश्रीमुखेन्दुप्रभार्चितः ॥ ९३॥

विध्यंसविन्यस्तभुजो विष्वक्सेनादिसंवृतः ।
विध्यण्डरेणुसञ्चारक्षमरोमान्धुजालकः ॥ ९४॥

विश्वम्भरारजःपुञ्जगणकागण्यवीर्यवान् ।
विष्टपत्रयपूर्वोर्ध्वलोकविष्कम्भकस्यदः ॥ ९५॥

विरिञ्चिकल्पान्तसाक्षी विरिञ्चिप्रीतिवर्धनः ।
विरिञ्च्ययुतसाहस्रजनको विधिपावकः ॥ ९६॥

विरिञ्चिदत्तप्रवररक्षःखण्डनपण्डितः ।
विरिञ्चिकार्यनिर्वाहो विरिञ्चिपरदैवतम् ॥ ९७॥

विरिञ्चिपुत्रोपदिष्टतत्त्वो विधिहृदालयः ।
विपञ्चीशिल्पदेवर्षिसङ्गीतो विधिसौहृदः ॥ ९८॥

विधिसत्त्वोन्मेषकारी विधिवक्राटवीहरिः ।
विधिलोकातिनेदीयान् विधिमुक्तिप्रदायकः ॥ ९९॥

विधिबम्भरनाभ्यब्जो विधिवक्राब्जभास्करः ।
विधिलोककृतश्रेया विधिबन्धुर्विधीष्टदः ॥ १००॥

विष्टपेशीकृतविधिर्विधिदत्ताखिलागमः ।
विधिसौभाग्यसन्धाता विधिचेतोविशोधनः ॥ १०१॥

विश्वोपजीव्यो विश्वान्यो विश्वानन्यो विडर्दनः ।
विश्वशम्भुर्विरूपाक्षजिह्वारङ्गस्थलीनटः ॥ १०२॥

विरूपाक्षजटाकाशगङ्गावर्षबलाहकः ।
विरूपाक्षशरण्याङ्घ्रिर्विरूपाक्षत्रिशूलदः ॥ १०३॥

विरूपाक्षद्विषद्भस्मासुरप्राणविनाशनः ।
विरूपाक्षपरित्राता विरूपाक्षशुभप्रदः ॥ १०४॥

विरूपाक्षबलाधाता विरूपाक्षजयप्रदः ।
विरूपाक्षस्मयाहर्ता विरूपाक्षेषुभूतभः ॥ १०५॥

विरूपाक्षजयी विभ्राड्विरूपाक्षविपक्षहृत् ।
विरूपाक्षप्रीतिपात्रं विरूपाक्षमनोगतः ॥ १०६॥

विरूपाक्षमयो विद्धविरूपाक्षतमोऽशुभः ।
विरूपाक्षानन्तकोटिक्षयसाक्षी विरोधजित् ॥ १०७॥

विरूपनेत्रहृदयं विरूपाक्षपितामहः ।
विरूपनेत्रसद्बन्धुर्विरूपाक्षमुखोक्षिदः ॥ १०८॥

विरूपाक्षसमानात्मा विरूपाक्षाष्टसिद्धिदः ।
विरूपाक्षमहादेवो विरूपाक्षमहागुरुः ॥ १०९॥

विरूपनेत्रान्तरात्मा विरूपाक्षसमीरणः ।
विरूपाक्षपरिज्ञेयतत्त्वो विविधमार्गकृत् ॥ ११०॥

विरूपाक्षब्रह्महत्याहरभिक्षाप्रदापनः ।
विरूपाक्षाभयकरो विरूपाक्षविमोहनः ॥ १११॥

विरूपनेत्रोपभुक्तविषववीर्यविनाशनः ।
विरूपाक्षकृतत्त्रासो विश्वभव्यमहातपाः ॥ ११२॥

विरूपाक्षप्रजारक्षो विरूपाक्षविमोक्षदः ।
विरूपाक्षमताविष्टपाषण्डजनतापनः ॥ ११३॥

विरूपाक्षललाटाक्षि वीतिहोत्राहितप्रभः ।
विधिरुद्रादिकुल्यान्तर्वृष्टशक्तिजलाम्बुदः ॥ ११४॥

विधिरुद्रादिमानौघपूर्णमायापयोनिधिः ।
विश्वप्राणान्तरो विश्वप्राणाधिष्ठातृपौरुषः ॥ ११५॥

विनायकाभ्यवहृतिक्रियाविघ्ननिवारकः ।
विनायकायुताधीश विष्यक्सेनोपसेवितः ॥ ११६॥

विनायककराब्धारास्नपितश्रीस्वयंवृतः ।
विनायकैकरदनच्छेदशान्तसुदर्शनः ॥ ११७॥

विनायकसमुद्गीतो विनायकवरप्रदः ।
विनायकपरित्राता विनायकभयावहः ॥ ११८॥

विनायकशरण्याङ्घ्रिर्विनायकशुभप्रदः ।
विनायकोदरस्थाग्निज्वालावर्धनमारुतः ॥ ११९॥

विश्वजन्तूदराग्न्यात्मा विश्वान्नप्रतिपादकः ।
विश्वम्भरापुण्यगन्धो विद्युत्त्वत्पुष्पसद्रसः ॥ १२०॥

विरोचनलसद्रूपं वियच्छब्दो विटेड्कृतिः ।
विरोचनसखस्पर्शो विधुज्योत्स्नाविकातपः ॥ १२१॥

विषशेवधिगाम्भीर्यं विश्वज्ञानं विवित्सुखम् ।
विश्वमङ्गलमाङ्गल्यं विश्वपूरुषपौरुषम् ॥ १२२॥

विश्वम्भराक्षमा विद्युद्रुचिर्विक्रान्तविक्रमः ।
विद्युत्त्वदुदयो विद्युद्भङ्गो विधुविभेदनः ॥ १२३॥

विकम्पनो विषनिधिसन्निवृत्तिर्विवित्पतिः ।
विनिवृत्तिर्विप्रवृत्तिर्विभावसुगतिर्विदः ॥ १२४॥

विश्वाधिको विटवरात्युच्छ्रितो विटधारयः ।
विटेन्द्रो विटराड्भङ्गनिलयो विटवर्धनः ॥ १२५॥

विषराणमन्थनो विद्युत्स्फुरन्मकरकुण्डलः ।
विटकूटाक्रान्तभुजो विषध्रेन्द्रविकर्षणः ॥ १२६॥

विष्फुरद्भुजसन्दोहपर्यायाक्रान्तमन्दरः ।
विध्वनत्करसाहस्रभर्त्सिताकर्ककरोत्करः ॥ १२७॥

विचलत्कचवृन्दाभ्रमालाञ्जनवपुर्धरः ।
विस्तीर्णवलिमद्रक्तकण्ठो विमृदितप्रजः ॥ १२८॥

विवल्गत्पृथुलश्रोणिर्विरणन्मणिकङ्कणः ।
विभ्रस्यदूर्ध्वकौशेयो विविधद्रुसुमाप्लुतः ॥ १२९॥

विविधस्वरसम्पूर्णमञ्जुगीतविनोदनः ।
विषधीन्द्रकरोदञ्चत्पयःक्षालितसत्पदः ॥ १३०॥

विभ्रमाक्रान्तविबुधवल्लवीदृष्टिमानसः ।
विस्फुरद्धासविभवध्वस्तसर्वाद्रिकश्मलः ॥ १३१॥

विधुवक्रस्मितज्योत्स्नावर्धितक्षीरवारिधिः ।
विशिखापाङ्गनिहतलक्ष्मीचित्तो विनोदभाक् ॥ १३२॥

विश्वावस्वादिगन्धर्वगीयमानगुणेहितः ।
विधिरुद्रेन्द्रकलितजयशब्दो विषार्दनः ॥ १३३॥

विश्राणनगुणाक्रान्तकामधेनुसुरद्रुमः ।

विबुधद्विपसङ्क्रान्तगतिगाम्भीर्यसद्गुणः ॥ १३४॥

विधुमण्डलसङ्क्रान्तमुखकञ्जप्रभाकलः ।
विबुधाश्वोपसङ्क्रान्तवैशद्यविशदश्रवाः ॥ १३५॥

विबुधाहारसङ्क्रान्तमाधुर्यमधुराधरः ।
विबुधक्षितिवामाक्षीक्रान्तसौन्दर्यविग्रहः ॥ १३६॥

विषरत्नोपसङ्क्रान्ततेजा विश्वप्रमाणदित् ।
विश्वव्यवस्थासन्धाता विश्वसङ्ग्रहनिग्रहः ॥ १३७॥

विषराड्ढीकरक्षौघचित्रिताकारपुष्करः ।
विषाक्तेद्यो विषादाद्यो विषधिर्विषनाशनः ॥ १३८॥

विश्वमातृस्मरोन्मेषो विश्वमातृस्वयंवृतः ।
विश्वमातृकटाक्षालिपीयमानपदाम्बुजः ॥ १३९॥

विश्वमातृसमानात्मा विश्वमातृपरीक्षितः ।
विश्वमातृस्मिताहारो विश्वमातृपदाङ्कितः ॥ १४०॥

विश्वमातृकलाभूषो विश्वमात्रधरस्पृहः ।
विश्वाम्बिकोरोजकुम्भनाभिलेपायिताकृतिः ॥ १४१॥

विश्वमातृमुखाम्भोजकस्तूरीतिलकद्दृशः ।
विश्वमातृशिरोजौघमेघमण्डलभृत्करः ॥ १४२॥

विश्वमातृकुचोर्वीध्रविश्रान्ताद्भुतवारिदः ।
विश्वमातृमुखानङ्कचन्द्रमण्डलमानदः ॥ १४३॥

विश्वमातृमुखाम्भोजपीयमानाधरामृतः ।
विश्वमातृभुजव्याजिचम्पकस्रग्लसद्गलः ॥ १४४॥

विश्वमातृकुचद्वन्द्वपीडितोरस्थलस्रजः ।
विश्वमातृदृशाभृङ्गीपीतहृत्पद्मसद्रसः ॥ १४५॥

विश्वमातृकपोलान्तःप्रतिबिम्बितसन्मुखः ।
विश्वमातृमुखाम्भोजप्रतिमाभृत्कपोलकः ॥ १४६॥

विश्वमातृश्रवोभूषारुक्पूरश्वेतिताननः ।
विद्रुमीकृतपद्मासन्नासिकामौक्तिकाधरः ॥ १४७॥

विश्वमातृशिरस्सौरीश्लिष्टगङ्गाकृताप्लवः ।
विश्वमातृदृगन्ताभाक्षणनीलोत्तराधरः ॥ १४८॥

विश्वमातृदृगम्भोजसङ्कोचोन्मेषदेक्षणः ।
विश्वमात्रलकाक्षेपासहनेन्दुकलानखः ॥ १४९॥

विश्वमात्राननादर्शवृन्तश्चिबुकधृत्करः ।
विश्वमात्रोष्ठपीयूषपानत्यक्तसुधाघटः ॥ १५०॥

विपञ्चीस्वरजिल्लक्ष्मीगानमाधुर्यविस्मितः ।
विश्वमातृस्वर्णलतावपन्तायतविग्रहः ॥ १५१॥

विश्वमातृश्रुतिद्वन्द्वभूषणायितभाषणः ।
विश्वमातृवचःपुष्पमरन्दापूरिताशयः ॥ १५२॥

विश्वमातृस्वर्णपुत्रीभूषिताङ्कोपशोभितः ।
विश्वमातृमनोज्ञांसलक्ष्मीलालितसद्भुजः ॥ १५३॥

विश्वाम्बाकरकञ्जातनखाभारञ्जितस्तनः ।
विश्वाम्बापाङ्गनीलाब्जपूजितो विश्वमन्मथः ॥ १५४॥

विश्वाम्बाकैशिकामोदाघ्राणकेलिविचक्षणः ।
विश्वाम्बास्पर्शसुखितो विश्वाम्बामूर्धचुम्बकः ॥ १५५॥

विश्वाम्बामोहपाशाभवनमालाविभूषितः ।
विश्वाम्बाकुचकाश्मीररञ्जितोत्तरसत्पटः ॥ १५६॥

विश्वम्भरालसत्पृष्ठो विश्वाम्बादृढसौहृदः ।
विश्वम्भराविश्वमातृमण्डितोभयपार्श्वकः ॥ १५७॥

विश्वम्भराधृताम्भोजच्छत्रो विश्वम्भराप्रियः ।
विश्वाम्बाकरगस्वर्णवालव्यजनवीजितः ॥ १५८॥

विश्वम्भराविश्वमातृवामसव्यकुचग्रहः ।
विश्वम्भराविश्वमातृन्यस्तैकैकाम्बुजेक्षणः ॥ १५९॥

विश्वम्भरासमुल्लासो विश्वाम्बामानवर्धनः ।
विश्वाम्बानुनयाभिज्ञो विश्वाम्बावचनानुगः ॥ १६०॥

विश्वम्भराविश्वमातृसव्यासव्यकरग्रहः ।
विश्वम्भराकृष्णवेणीसंसेवासुखिताशयः ॥ १६१॥

विश्वम्भरोपथिभुजो विश्वाम्बाकशिपूदरः ।
विश्वम्भराश्लेषिदिव्यभव्यार्चाविग्रहायुतः ॥ १६२॥

विश्वम्भरागर्भदाता विश्वाम्बाभोगवर्धनः ।
विश्वम्भरासमुद्धर्ता विश्वाम्बानित्यसंयुतः ॥ १६३॥

विश्वम्भरानित्यबन्धुर्विश्वाम्बाजन्मभूरुचिः ।
विश्वम्भराकराम्भोजशुकसंस्तुतसद्गुणः ॥ १६४॥

विश्वम्भरागर्भलीनदिव्यौषधिसमुद्धरः ।
विश्वम्भराधेनुवृषो विश्वधर्मपरायणम् ॥ १६५॥

विरुद्धधर्मनिर्हर्ता विविधत्रातृविग्रहः ।
विश्वम्भरापराधारो विश्वकञ्चुकिताकृतिः ॥ १६६॥

विश्वबीजब्रह्मयोनिर्विश्वयोनिप्रकल्पकः ।
विश्वविश्वेदेवदेवो विश्वभाषाविशारदः ॥ १६७॥

विविधग्रन्थविषयो विश्वमन्त्रार्थसङ्ग्रहः ।
विविधानन्तमन्त्रार्थो विश्वमन्त्राधिदैवतम् ॥ १६८॥

विग्रहोपलसन्मन्त्रो विश्वमन्त्रफलप्रदः ।
विश्वाम्नायमयो विश्वमन्त्रादिर्विश्वमन्त्रसत् ॥ १६९॥

विविधास्त्रप्रयोगज्ञो विविधास्त्रमयाकृतिः ।
विविधास्त्रोपसंहारवेत्ता विश्वास्त्रभञ्जनः ॥ १७०॥

विश्वास्त्रवारणात्मास्त्रो विश्वास्त्रास्पृश्यविग्रहः ।
विश्वास्त्रबलसन्धाता विविधास्त्रसमुद्भवः ॥ १७१॥

वितथेतरवागस्त्रो विविधास्त्रमहेश्वरः ।
विविधाम्नायनिश्श्वासो विदीप्तश्रुतिमस्तकः ॥ १७२॥

विश्ववेदैकसंवेद्यो विहिताम्नायमस्तकः ।
विग्रहाश्वाद्वेदवन्तिस्तुतो विविधवेदवित् ॥ १७३॥

विविधाम्नायसन्मालानायको विवृतश्रुतिः ।
विध्यर्थवादाविषयो विलसच्छ्रुतिवल्लभः ॥ १७४॥

विश्वम्भराप्रविष्टात्मधृतभूतो विलाघवः ।

विधुभूतात्मसम्पुष्टविविधौषधिमण्डलः ॥ १७५॥

विश्वानरसुताविष्टस्वतेजःपाचितौदनः ।
विरोचनसभाऽऽविष्टस्वशक्त्युज्जीवितप्रजः ॥ १७६॥

विभावसुसमाविष्टस्वतेजोवृष्टभूतलः ।
विश्वोपसङ्क्रान्तसच्चित्सुखांशो विश्वविभ्रमः ॥ १७७॥

विभक्त्यर्थो विभक्तिस्थशक्तिरूपो विभक्तिकृत् ।
विभक्त्यगोचरपदो विभक्त्यात्मा विभक्तिभृत् ॥ १७८॥

विश्वापोहो विश्ववृत्तिर्विश्वज्ञानो विभोजनः ।
विश्वस्मृतिर्विश्वनिद्रो विश्वजागरणो विदृक् ॥ १७९॥

विश्वप्रेमास्पदवदो विश्वभूतादिवत्सलः ।
विश्वरत्नोदरो विश्ववसुजिद्विश्वमन्दिरः ॥ १८०॥

विषशेवधिजामाता विषधिश्वशुरोत्तमः ।
विश्वप्रियाबुद्धिगुरुर्विश्वसूप्रकृतिप्रियः ॥ १८१॥

विश्रवस्तनयाधीशो विश्रवस्सुतशेवधिः ।
विश्रवस्तनयोदारधनदो विश्रवस्सुतः ॥ १८२॥

विश्रवस्सुतसंसेव्यो विश्रवस्सुतबान्धवः ।
विश्रवस्सुतसन्त्राता विश्रवस्सुतकामदः ॥ १८३॥

विश्रवस्सुतहृद्वासो विश्रवस्सुतचोदनः ।
विश्रवस्सुतदुर्ज्ञेयो विश्रवस्सुततोषितः ॥ १८४॥

विश्रवस्सुतदत्तोत्तराशो विश्रवाश्रयः ।
विश्रवस्तवयैश्वर्यप्रदलक्ष्मीदृगञ्चलः ॥ १८५॥

विबुधेश्वरदृक्पद्मसहस्रामितसौभगः ।
विबुधाधिपसोदर्यो विबुधाधिपपालनः ॥ १८६॥

विबुधेन्द्रो विबुधराड्वितीर्णविबुधालयः ।
विबुधेन्द्रारिसंहर्ता विबुधेन्द्रविपद्धरः ॥ १८७॥

विबुधेन्द्रविपद्बन्धुर्विबुधेन्द्रप्रसादितः ।
विबुधेन्द्रकृतैश्वर्यो विबुधेश्वरकामदः ॥ १८८॥

विबुधेन्द्रशतैश्वर्यो विरोचनसुतान्दनः ।
विबुधेन्द्रकृतशतक्रतुर्विबुधनाथजित् ॥ १८९॥

विबुधाधीशपक्षपातो विबुधस्त्रीप्रणर्तितः ।
विबुधस्त्रीलतोपघ्नो विबुधेश्वरसाह्यकृत् ॥ १९०॥

विबुधेन्द्रायुधस्थात्मतेजा विबुधदीपनः ।
विबुधाहारितसुधो विबुधोत्साहवर्धनः ॥ १९१॥

विबुधासुरसङ्ग्रामजयलक्ष्मीसमञ्चितः ।
विबुधास्याब्जमार्तण्डो विबुधेन्द्रपुरोहितः ॥ १९२॥

विबुधाचार्यसंशास्ता विबुधाचार्यदेशिकः ।
विबुधाचार्यसंस्तुत्यो विबुधाचार्यमानदः ॥ १९३॥

विबुधद्रुमसन्तानपुष्पलक्ष्मीनिषेवितः ।
विबुधद्रुममूलस्थो विबुधद्रुमजन्मकृत् ॥ १९४॥

विबुधध्वजिनीपालो विशाखामितवीर्यदः ।
विशाखातनयत्त्राता विशाखहृदयान्तरः ॥ १९५॥

विशाखविन्यस्तनिजतेजा विजिततारकः ।
विशाखाद्भुतदर्पाब्धिकुम्भभूर्विबुधोदयः ॥ १९६॥

विशाखषण्मुखाश्रान्तगीतषड्गुणभूषणः ।
विशाखातनयव्यूहसेनापालनपण्डितः ॥ १९७॥

विशाखासुतविद्यादो विशाखासुतचोदनः ।
विशाखप्रीतहृदयो विशाखपरिपूजितः ॥ १९८॥

विशाखनिर्दम्भबन्धुर्विशाखपरदैवतम् ।
विशाखपरमोदारतपोवल्लीफलप्रदः ॥ १९९॥

विकैतवतपोरूपो विदोषतपाश्रयः ।
विदर्शनतपःप्राप्यो विविघ्नसुतपःप्रियः ॥ २००॥

विषाधीशो विषाधीशचेतःकमलभास्करः ।
विषाधीशप्रतीचीदो विषेशज्ञानदायकः ॥ २०१॥

विषाधीशान्तरारामो विषाधीशहृदीश्वरः ।
विषाधीश्वरविज्ञाततत्त्वो विषपतिप्रियः ॥ २०२॥

विविक्तद्वारनवकब्रह्मपत्तनभासनः ।
विस्रुतामृतसम्पूर्णब्रह्मपुर्यन्तरुज्ज्वलः ॥ २०३॥

विशुद्धचक्रनिलयो विशुद्धारिद्दिगर्चितः ।
विशुद्धचक्रावेशितासुप्राप्यो विविधचक्रकृत् ॥ २०४॥

विविक्तषड्वक्रपुरस्वामी विविधचक्रगः ।
विशुद्धचक्रोपरिस्थपूर्णचन्द्रो विशुद्धदृक् ॥ २०५॥

विधुभास्वन्नाडिकान्तस्सुषुम्नाग्रतलालयः ।
विविक्तोत्थापिताहीन्द्रस्रुतामृतपसत्प्रियः ॥ २०६॥

विरतस्वान्तकमलप्रतीतो वितमःप्रभः ।
विपरानुभवाकारो विश्वशून्यविचक्षणः ॥ २०७॥

विविकल्पसमाध्यात्मा विविकल्पसमाधिभाक् ।
विविकल्पसमाध्यास्यो विविकल्पसमाधिदृक् ॥ २०८॥

विकल्पितसमाधिस्थपुरुषाज्ञेयसत्पदः ।
विविक्तसच्चित्सुखात्मा विश्वमायादुरन्वयः ॥ २०९॥

विकल्पितदभावानाकलितो विलयोदयः ।
विद्याविद्योपाधिहीनो विद्याविद्याप्रकल्पनः ॥ २१०॥

विशेषहीनचिद्रूपमायाकल्पितदेहभाक् ।
विवादाविषयावार्यमायो विप्रकृतिप्रभः ॥ २११॥

विषुवाद्यपरिच्छेद्यो विभावर्यादिकल्पनः ।
विभावर्याद्यवयववत्सरात्मकचक्रकृत् ॥ २१२॥

विनिरोधाब्दचक्रोरुवेगात्तपुरुषायुषः ।
विश्वत्त्राणात्मचरणप्रसन्नध्रुवसद्गतिः ॥ २१३॥

विभ्रमत्कालनेमिघ्नो विषुवो विषुवप्रभुः ।
विकालचक्रपदगो विवस्वद्भ्रमणातिगः ॥ २१४॥

विवस्वदायुःकलनो विवस्वत्सुतशासनः ।
विवस्वत्तनयोदारदण्डपाशाहितप्रभः ॥ २१५॥

विकलाकाष्ठादिसत्यकालो विश्वोत्तरापदः ।

विपूर्वो विप्रतीचीको विधिलोकादिदक्षिणः ॥ २१६॥

विवस्वद्विधुतारादिभ्रमणागोचरालयः ।
विध्वादिमच्छिंशुमारचक्रनित्यभ्रमावहः ॥ २१७॥

विश्वामित्रादिसप्तर्षिपूजितध्रुवलोककृत् ।
विश्वामित्रादिसप्तर्षिदत्तज्योतिर्मयक्षितिः ॥ २१८॥

विविक्तनक्षत्रपथो वियद्गङ्गाधुनीधरः ।
विवस्वत्स्यन्दनाधारो विधुलोकरसावहः ॥ २१९॥

विद्युद्विवस्वद्वरुणाद्यातिवाहिककल्पकः ।
विरोचनज्योतिराद्यापुनरावृत्तिमार्गकृत् ॥ २२०॥

विधूतकलुषोदारभक्तदत्तात्मरूपकः ।
विमानप्रवरानीतभक्तदर्शनकौतुकः ॥ २२१॥

विधिरुद्रादिसत्कारतुष्टभक्तप्रियंवदः ।
विद्युदम्बरसच्छङ्खचक्रभक्तगणावृतः ॥ २२२॥

विमुक्तनित्यमुक्तात्मसेवितो विच्युतिस्वकः ।
विमुक्तनयनानन्दो विमुक्तहृदयप्रियः ॥ २२३॥

विमुक्तहृदयारामो विमुक्तोक्तात्मतत्त्वकः ।
विमुक्तजनसंवादी विमुक्तजनतर्पणः ॥ २२४॥

विरजातोयसंसर्गाप्राकृतात्मकृतस्वकः ।
विरजातीरकान्तारविहृतो विरजाप्रियः ॥ २२५॥

विरजातोयसंसर्गात्प्राकृतात्मीकृतस्वकः ॥ २२६॥ (only one line)

विरजातीरतुलसीवनदेवीनिषेवितः ।
विरजातोयकणभाक्सुगन्धिपवनार्चितः ॥ २२७॥

विरजातोयकपटसच्चिदानन्दविग्रहः ।
विरजा विरजातोयसुस्नातो विरजापतिः ॥ २२८॥

विरजोर्मिच्छटाडोलाविहारी विरजान्तरः ।
विरजादेवताकेलिर्विरजाविभ्रमाशयः ॥ २२९॥

विरजामीननयनाकरालिङ्गितकन्धरः ।

विरजावर्तनाभीदृग्विरजापुलिनाश्रयः ॥ २३० ॥

विरजाकुचकञ्जातकोशगृध्नुकरद्वयः ।
विरजाविहगश्रेणिकाञ्ची विघटनोत्करः ॥ २३१ ॥

विकुण्ठलक्ष्मीदुकूलविरजाम्बुविलोलनः ।
विरजामुखकञ्जातचुम्बनो विरजोदयः ॥ २३२ ॥

विरजाभुवनक्रीडानिर्जितप्रेयसीगणः ।
विरजाजलगूढात्मा विरजाक्लेदिताम्बरः ॥ २३३ ॥

विरजातीरविहरद्वैमानिककृतोत्सवः ।
विरजाजलजन्त्वोघमुक्तौघपरिपूजितः ॥ २३४ ॥

विरजामृतपानाप्तब्रह्मानन्दपुरीजनः ।
विरजासलिलाधारो विरजीभूतमायकः ॥ २३५ ॥

विरजापदतीरस्थो विरजापरिघालयः ।
विरजागाधसलिलभीतभीतविरिञ्चनः ॥ २३६ ॥

विरजातोयपानाप्तविद्याभक्तजनेदितः ।
विनायकध्वजभ्राजद्विमानवरभूषणः ॥ २३७ ॥

वियद्विमानविभ्राजदबलातारकाविधुः ।
विकुण्ठनगरीनारीनीराजितपदाम्बुजः ॥ २३८ ॥

विकुण्ठपौरीनेत्रालिलीयमानोत्सवासवः ।
विस्पष्टेन्दीवराभात्मलग्नलक्ष्मीमुखेन्दुभः ॥ २३९ ॥

विश्वाम्बाहेमपुत्रीभृद्वक्षोनीलाश्मपीठकः ।
विधुबिम्बोपरिस्थार्कभानुविद्योतिताम्बरः ॥ २४० ॥

विवेलात्मप्रभापूरनीलीकृतमहाहिपः ।
विषघ्नमूर्धसाहस्ररत्नाभालेपचित्रितः ॥ २४१ ॥

विसारितैकबाह्वग्रकङ्कणाभाञ्चितेन्दिरः ।
विश्वाम्बाकरकञ्जातलक्ष्मीलालितजानुकः ॥ २४२ ॥

विचित्रदिव्याभरणांशुकाभासिन्धूदयश्रीमुखचन्द्रबिम्बः ।
विष्वक्कृपादर्शितकामपूरनखेन्दुभिन्नाङ्गुलिपादपद्मः ॥ २४३ ॥

विश्वालयव्यापिविचित्रगन्धमल्लीतुलस्यम्बुजचुम्बिताङ्गः ।
विश्वम्भरावासितचारुगन्ध विप्ताङ्गनीरन्ध्रपतद्द्विरेफः ॥ २४४॥

विवृत्तरत्नोपधिपुष्पमालागृहीतगन्धाद्भुतकेशवेशः ।
विचित्रभूषाम्बरवैष्णवस्त्रीसङ्गीतनाट्याकलनस्मितास्यः ॥ २४५॥

विनायकोदारसुपर्णकम्पनप्रभूतदिव्यानिललोलितालकः ।
विरिञ्चिना द्युन्मकुटप्रभाझरीनिषिक्तपादो विविदाशयाञ्चितः ॥ २४६ ॥

विनायकश्रौतरथाधिरूढसद्विनायकापाङ्गसुधामयाकृतिः ।
विचित्रसाहस्रसुमाधिरोहताद्विनायकोदारगलं सुखादियम् ॥ २४७॥

पराभवज्येष्ठकमासपूर्णिमातिथौ समाप्तिं गमितासकौ कृतिः ।
सुखेन रामेण समर्पिता हरेः पदाब्जयोराविधुभासतान्तराम् ॥

पराभवाषाढशुद्धद्वादश्यामसकौ कृतिः ।
रामेण सर्वा व्याख्याता प्रापिता च हरेः पदम् ॥

॥ एवं सहस्रनामानि कृत्वा भगवते कृति नायकाय समर्पयति ॥

॥ श्री हयग्रीवार्पण मस्तु ॥

इति विवर्णादि विष्णुसहस्रनामस्तोत्रं सम्पूर्णम् ।

Composed by Bellamkonda Rama Raya Kavindrulu (1875-1914)

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Malleswara Rao Yellapragada, PSA Easwaran

---

*Vivarnadi Vishnu Sahasranamastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*